# Natya Shastra Chapter 27

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૨૭

## Document Information

Text title : naaTyashaastra adhyaaya 27

File name : natya27.itx

Category : nATyashAstra, major_works, bharata

Location : doc_z_misc_major_works

Author : Sage Bharata

Transliterated by : dpadmakar at hotmail.com

Proofread by : dpadmakar at hotmail.com

Latest update : November 23, 2002

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૨૭

॥ શ્રીરસ્તુ ॥

ભરતમુનિપ્રણીતં નાટ્યશાસ્ત્રમ્
અથ સપ્તવિંશોઽધ્યાયઃ
સિદ્ધીનાં તુ પ્રવક્ષ્યામિ લક્ષણં નાટકાશ્રયમ્ ।
યસ્માત્પ્રયોગઃ સર્વોઽયં સિદ્ધ્યર્થં સમ્પ્રદર્શિતઃ ॥ ૧॥

I will now tell the features of 'achievements' which are related to the drama since every performance is presented for the 'achievements'. 1.
સિદ્ધિસ્તુ દ્વિવિધા જ્ઞેયા વાઙ્મનોઽઙ્ગસમુદ્ભવા ।
દૈવી ચ માનુષી ચૈવ નાનાભાવસમુત્થિતા ॥ ૨॥

'achievments' are known to be two fold - arising out of speech and mind and out of body. arising out of many emotions, it is also divine and human.
દશાઙ્ગા માનુષી સિદ્ધીર્દૈવી તુ દ્વિવિધા સ્મૃતા ।
નાનાસત્ત્વાશ્રયકૃતા વાઙ્નૈપથ્યશરીરજા ॥ ૩॥

The human achievements have ten types and divine is known to be two fold. It is based on various characters and born out of speech, drapery and body (of the actor).
સ્મિતાપહાસિની હાસા સાધ્વહો કષ્ટમેવ ચ ।
પ્રબદ્ધનાદા ચ તથા સિદ્ધિર્જ્ઞેયાથ વાઙ્મયી ॥ ૪॥

પુલકૈશ્ચ સરોમાઞ્ચૈરભ્યુત્થાનૈસ્તથૈવ ચ ।
ચેલદાનાઙ્ગુલિક્ષેપૈઃ શારીરી સિદ્ધિરિષ્યતે ॥ ૫॥

કિઞ્ચિચ્છ્લિષ્ટો રસો હાસ્યો નૃત્યદ્ભિર્યત્ર યુજ્યતે ।
સ્મિતેન સ પ્રતિગ્રાહ્યઃ પ્રેક્ષકૈર્નિત્યમેવ ચ ॥ ૬॥

કિઞ્ચિદસ્પષ્ટહાસ્યં યત્તથા વચનમેવ ચ ।

અર્થહાસ્યેન તદ્ગ્રાહ્યં પ્રેક્ષકૈર્નિત્યમેવ હિ ॥ ૭॥

વિદૂષકોચ્છેદકૃતં ભવેચ્છિલ્પકૃતં ચ યત્ ।
અતિહાસ્યેન તદ્ગ્રાહ્યં પ્રેક્ષકૈર્નિત્યમેવ તુ ॥ ૮॥

અહોકારસ્તથા કાર્યો નૃણાં પ્રકૃતિસંભવઃ ।
યદ્ધર્મપદસંયુક્તં યથાતિશયસંભવમ્ ॥ ૯॥

તત્ર સાધ્વિતિ યદ્વાક્યં પ્રયોક્તવ્યં હિ સાધકૈઃ ।
વિસ્મયાવિષ્ટભાવેષુ પ્રહર્ષાર્થેષુ ચૈવ હિ ॥ ૧૦॥

કરુણેઽપિ પ્રયોક્તવ્યં કષ્ટં શાસ્ત્રકૃતેન તુ ।
પ્રબદ્ધનાદા ચ તથા વિસ્મયાર્થેષુ નિત્યશઃ ॥ ૧૧॥

સાધિક્ષેપેષુ વાક્યેષુ પ્રસ્પન્દિતતનૂરુહૈઃ ।
કુતૂહલોત્તરાવેધૈર્બહુમાનેન સાધયેત્ ॥ ૧૨॥

દીપ્તપ્રદેશં યત્કાર્યં છેદ્યભેદ્યાહવાત્મકમ્ ।
સવિદ્રવમથોત્ફુલ્લં તથા યુદ્ધનિયુદ્ધજમ્ ॥ ૧૩॥

પ્રકમ્પિતાંસશીર્ષઞ્ચ સાશ્રં સોત્થાનમેવ ચ ।
તત્પ્રેક્ષકૈસ્તુ કુશલૈસ્સાધ્યમેવં વિધાનતઃ ॥ ૧૪॥

એવં સાધયિતવ્યૈષા તજ્જ્ઞૈઃ સિદ્ધિસ્તુ માનુષી ।
દૈવિકીઞ્ચ પુનઃ સિદ્ધિં સમ્પ્રવક્ષ્યામિ તત્ત્વતઃ ॥ ૧૫॥

યા ભાવાતિશયોપેતા સત્ત્વયુક્તા તથૈવ ચ ।
સા પ્રેક્ષકૈસ્તુ કર્તવ્યા દૈવી સિદ્ધિઃ પ્રયોગતઃ ॥ ૧૬॥

ન શબ્દો ન યત્ર ન ક્ષોભો ન ચોત્પાતનિદર્શનમ્ ।
સમ્પૂર્ણતા ચ રંગસ્ય દૈવી સિદ્ધિસ્તુ સા સ્મૃતા ॥ ૧૭॥

દૈવી ચ માનુષી ચૈવ સિદ્ધિરેષા મયોદિતા ।
અત ઊર્ધ્વં પ્રવક્ષ્યામિ ઘાતાન્દૈવસમુત્થિતન્ ॥ ૧૮॥

દૈવાત્મપરસમુત્થા ત્રિવિધા ઘાતા બુધૈસ્તુ વિજ્ઞેયા ।
ઔત્પાતિકશ્ચતુર્થઃ કદાચિદથ સંભવત્યેષુ ॥ ૧૯॥

વાતાગ્નિવર્ષકુઞ્જરભુજઙ્ગમણ્ડપનિપાતાઃ ।
કીટવ્યાલપિપીલિકપશુપ્રવેશનાશ્ચ દૈવકકૃતા ॥ ૨૦॥

ઘાતનતઃ પરમહં પરયુક્તાન્ સમ્પ્રવક્ષ્યામિ ।
[વૈવર્ણ્યં ચાચેષ્ટં વિભ્રમિતત્વં સ્મૃતિપ્રમોહશ્ચ ॥ ૨૧॥

અન્યવચનં ચ કાવ્યં તથાંગદોષો વિહસ્તત્વમ્ ।
એતે ત્વાત્મસમુત્થા ઘાતા જ્ઞેયા પ્રયોગજ્ઞૈઃ ॥ ૨૨॥]
માત્સર્યાદ્વ્વેષાદ્વા તત્પક્ષત્વાત્તથાર્થભેદત્વાત્ ।
એતે તુ પરસમુત્થા જ્ઞેયા ઘાતા બુધૈર્નિત્યમ્ ॥ ૨૩॥

અતિહસિતરુદિતવિસ્ફોટિતાન્યથોત્કૃષ્ટનાલિકાપાતાઃ ।
ગોમયલોષ્ટપિપીલિકાવિક્ષેપાશ્ચારિસંભૂતાઃ ॥ ૨૪॥

ઔત્પતિકાશ્ચ ઘાતા મત્તોન્મત્તપ્રવેશલિઙ્ગકૃતઃ ।
પુનરાત્મસમુત્થા યે ઘાતાંસ્તાંસ્તાન્ પ્રવક્ષ્યામિ ॥ ૨૫॥

વૈલક્ષણ્યમચેષ્ટિતવિભૂમિકત્વં સ્મૃતિપ્રમોષશ્ચ ।
અન્યવચનં ચ કાવ્યં તથાર્તનાદો વિહસ્તત્વમ્ ॥ ૨૬॥

અતિહસિતરુદિતવિસ્વરપિપીલિકાકીટપશુવિરાવાશ્ચ ।
મુકુટાભરણનિપાતા પુષ્કરજાઃ કાવ્યદોષાશ્ચ ॥ ૨૭॥

અતિહસિતરુદિતહસિતાનિ સિદ્ધૈર્ભાવસ્ય દૂષકાણિ સ્યુઃ ।
કીટપિપીલિકપાતા સિદ્ધિં સર્વાત્મના ઘ્નાન્ત ॥ ૨૮॥

વિવસ્વરમજાતતાલં વર્ણસ્વરસમ્પદા ચ પરિહીણમ્ ।
અજ્ઞાતસ્થાનલયં સ્વરગતમેવંવિધં હન્યાત્ ॥ ૨૯॥

મુકુટાભરણનિપાતઃ પ્રબદ્ધનાદશ્ચ નાશનો ભવતિ ।
પશુવિશસનં તથ અ સ્યાદ્બહુવચનઘ્નં પ્રયોગેષુ ॥ ૩૦॥

વિષમં માનવિહીનં વિમાર્જનં ચાકુલપ્રહારં ચ ।
અવિભક્તગ્રહમોક્ષં પુષ્કરગતમીદૃશં હન્તિ ॥ ૩૧॥

પુનરુક્તો હ્યસમાસો વિભક્તિભેદો વિસન્ધયોઽપાર્થઃ ।
ત્રૈલિઙ્ગજશ્ચ દોષઃ પ્રત્યક્ષપરોક્ષસંમોહાઃ ॥ ૩૨॥

છન્દોવૃત્તત્યાગો ગુરુલાઘવસઙ્કરો યતેર્ભેદઃ ।
એતાનિ યથા સ્થૂલં ઘાતસ્થાનાનિ કાવ્યસ્ય ॥ ૩૩॥

જ્ઞેયૌ તુ કાવ્યજાતૌ દ્વૌ ઘાતાવપ્રતિક્રિયૌ નિત્યમ્ ।
પ્રકૃતિવ્યસનસમુત્થઃ શેષોદકનાલિકત્વમ્ ॥ ૩૪॥

અપ્રતિભાગં સ્ખલનં વિસ્વરમુચ્ચારણં ચ કાવ્યસ્ય ।
અસ્થાનભૂષણત્વં પતનં મુકુટસ્ય વિભ્રંશઃ ॥ ૩૫॥

વાજિસ્યન્દનકુઞ્જરખરોષ્ટ્રશિબિકાવિમાનયાનાનામ્ ।
આરોહણાવતરણેષ્વનભિજ્ઞત્વં વિહસ્ત્વમ્ ॥ ૩૬॥

પ્રહરણકવચાનામપ્યયથાગ્રહણં વિધારણં ચાપિ ।
અમુકુટભૂષણયોગશ્ચિરપ્રવેશોઽથવા રઙ્ગે ॥ ૩૭॥

એભિઃ સ્થાનવિશેષૈર્ઘાતા લક્ષ્યાસ્તુ સૂરિભિઃ કુશલૈઃ ।
યૂપાગ્નિચયનદર્ભસ્રગ્ભાણ્ડપરિગ્રહાન્મુક્ત્વા ॥ ૩૮॥

સિદ્ધ્યા મિશ્રો ઘાતસ્સર્વગતશ્ચૈકદેશજો વાપિ ।
નાટ્યકુશલૈઃ સલેખ્યા સિદ્ધિર્વા સ્યાદ્વિઘાતો વા ॥ ૩૯॥

નાલેખ્યો બહુદિનજઃ સર્વગતોઽવ્યક્તલક્ષણવિશેષઃ ।
યસ્ત્વૈકદિવસજાતસ્સ પ્રત્યવરોઽપિ લેખ્યસ્સ્યાત્ ॥ ૪૦॥

જર્જરમોક્ષ્યસ્યાન્તે સિદ્ધેર્મોક્ષસ્તુ નાલિકાયાસ્તુ ।
કર્તવ્યસ્ત્વિહ સતતં નાટ્યજ્ઞૈઃ પ્રાશ્નિકૈર્વિધિના ॥ ૪૧॥

દૈન્યે દીનત્વમાયાન્તિ તે નાટ્યે પ્રેક્ષકાઃ સ્મૃતાઃ ।
યે તુષ્ટૌ તુષ્ટિમાયાન્તિ શોકે શોકં વ્રજન્તિ ચ ॥ ૪૨॥

યોઽન્યસ્ય મહે મૂર્ધો નાંદીશ્લોકં પઠેદ્ધિ દેવસ્ય ।
સ્વવશેન પૂર્વરઙ્ગે સિદ્ધેર્ઘાતઃ પ્રયોગસ્ય ॥૪૩॥

યો દેશભાવરહિતં ભાષાકાવ્યં પ્રયોજયેદ્બુદ્ધ્યા ।
તસ્યાપ્યભિલેખ્યઃ સ્યાદ્ઘાતો દેશઃ પ્રયોગજ્ઞૈઃ ॥ ૪૪॥

કઃ શક્તો નાટ્યવિધૌ યથાવદુપપાદનં પ્રયોગસ્ય ।
કર્તું વ્યગ્રમના વા યથાવદુક્તં પરિજ્ઞાતમ્ ॥ ૪૫॥

તસ્માદ્ગમ્ભીરાર્થાઃ શબ્દા યે લોકવેદસંસિદ્ધાઃ ।
સર્વજનેન ગ્રાહ્યા યોજ્યા નાટકે વિધિવત્ ॥ ૪૬॥

ન ચ કિઞ્ચિદ્ગુણહીનં દોષૈઃ પરિવર્જિતં ન ચાકિઞ્ચિત્ ।
તસ્માન્નાટ્યપ્રકૃતૌ દોષા નાટ્યાર્થતો ગ્રાહ્યા ॥ ૪૭॥

ન ચ નાદરસ્તુ કાર્યો નટેન વાગઙ્ગસત્ત્વનેપથ્યે ।
રસભાવયોશ્ચ ગીતેષ્વાતોદ્યે લોકયુક્ત્યાં ચ ॥ ૪૮॥

એવમેતત્તુ વિજ્ઞેયં સિદ્ધીનાં લક્ષણં બુધૈઃ ।
અત ઊર્ધ્વં પ્રવક્ષ્યામિ પ્રાશ્નિકાનાં તુ લક્ષણમ્ ॥ ૪૯॥

ચારિત્રાભિજનોપેતાઃ શાન્તવૃત્તાઃ કૃતશ્રમાઃ ।
યશોધર્મપરાશ્ચૈવ મધ્યસ્થવયસાન્વિતાઃ ॥ ૫૦॥

ષડઙ્ગનાટ્યકુશલાઃ પ્રબુદ્ધાઃ શુચયઃ સમાઃ ।
ચતુરાતોદ્યકુશલાઃ વૃત્તજ્ઞાસ્તત્ત્વદર્શિનઃ ॥ ૫૧॥

દેશભાષાવિધાનજ્ઞાઃ કલાશિલ્પપ્રયોજકાઃ ॥

ચતુર્થાભિનયોપેતા રસભાવવિકલ્પકાઃ ॥ ૫૨॥

શબ્દચ્છન્દોવિધાનજ્ઞા નાનાશાસ્ત્રવિચક્ષણાઃ ।
એવં વિધાસ્તુ કર્તવ્યાઃ પ્રાશ્નિકા દશરૂપકે ॥ ૫૩॥

અવ્યગ્રૈરિન્દ્રિયૈઃ શુદ્ધ ઊહાપોહવિશારદઃ ।
ત્યક્તદોષોનુઅરાગી ચ સ નાટ્યે પ્રેક્ષકઃ સ્મૃતઃ ॥ ૫૪॥

ન ચૈવેતે ગુણાઃ સમ્યક્ સર્વસ્મિન્ પ્રેક્ષકે સ્મૃતાઃ ।
વિજ્ઞેયસ્યાપ્રમેયત્વાત્સંકીર્ણાનાં ચ પાર્ષદિ ॥ ૫૫॥

યદ્યસ્ય શિલ્પં નેપથ્યં કર્મચેષ્ટિતમેવ વા ।
તત્તથા તેન કાર્યં તુ સ્વકર્મવિષયં પ્રતિ ॥ ૫૬॥

નાનાશીલાઃ પ્રકૃતયઃ શીલે નાટ્યં વિનિર્મિતમ્ ।
ઉત્તમાધમમધ્યાનાં વૃદ્ધબાલિશયોષિતામ્ ॥ ૫૭॥

તુષ્યન્તિ તરુણાઃ કામે વિદગ્ધાઃ સમયાત્વિતે ।
અર્થેષ્વર્થપરાશ્ચૈવ મોક્ષે ચાથ વિરાગિણઃ ॥ ૫૮॥

શૂરાસ્તુ વીરરૌદ્રેષુ નિયુદ્ધેષ્વાહવેષુ ચ ।
ધર્માખ્યાને પુરાણેષુ વૃદ્ધાસ્તુષ્યન્તિ નિત્યશઃ ॥ ૫૯॥

ન શક્યમધમૈર્જ્ઞાતુમુત્તમાનાં વિચેષ્ટિતમ્ ।
તત્ત્વભાવેષુ સર્વેષુ તુષ્યન્તિ સતતં બુધાઃ ॥ ૬૦॥

બાલા મૂર્ખાઃ સ્ત્રિયશ્ચૈવ હાસ્યનૈપથ્યયોઃ સદા ।
યસ્તુષ્ટો તુષ્ટિમાયાતિ શોકે શોકમુપૈતિ ચ ॥ ૬૧॥

ક્રુદ્ધઃ ક્રોધે ભયે ભીતઃ સ શ્રેષ્ઠઃ પ્રેક્ષકઃ સ્મૃતઃ ।
એવં ભાવાનુકરણે યો યસ્મિન્ પ્રવિશેન્નરઃ ॥ ૬૨॥

સ તત્ર પ્રેક્ષકો જ્ઞેયો ગુણૈરેભિરલઙ્કૃતઃ ।
એવં હિ પ્રેક્ષકા જ્ઞેયાઃ પ્રયોગે દશરૂપતઃ ॥ ૬૩॥

સંઘર્ષે તુ સમુત્પન્ને પ્રાશ્નિકાન્ સંનિબોધત ।
યજ્ઞવિન્નર્તકશ્ચૈવ છન્દોવિચ્છબ્દવિત્તથા ॥ ૬૪॥

અસ્ત્રવિચ્ચિત્રકૃદ્વેશ્યા ગન્ધર્વો રજસેવકઃ ।
યજ્ઞવિદ્યજ્ઞયોગે તુ નર્તકોઽભિનયે સ્મૃતઃ ॥ ૬૫॥

છન્દોવિદ્વૃત્તબન્ધેષુ શબ્દવિત્પાઠ્યવિસ્તરે ।
ઇષ્વસ્ત્રવિત્સૌષ્ઠવે તુ નેપથ્યે ચૈવ ચિત્રકૃત્ ॥ ૬૬॥

કામોપચારે વેશ્યા ચ ગાન્ધર્વઃ સ્વરકર્મણિ ।
સેવકસ્તૂપચારે સ્યાદેતે વૈ પ્રાશ્નિકાઃ સ્મૃતાઃ ॥ ૬૭॥

એભિર્દૃષ્ટાન્તસંયુક્તૈર્દોષા વાચ્યાસ્તથા ગુણાઃ ।
અશાસ્ત્રજ્ઞા વિવાદેષુ યથા પ્રકૃતિકર્મતઃ ॥ ૬૮॥

અથૈતે પ્રશ્નિકા જ્ઞેયાઃ કથિતા યે મયાનઘાઃ ।
શાસ્ત્રજ્ઞાનાદ્યદા તુ સ્યાત્સંઘર્ષઃ શાસ્ત્રસંશ્રયઃ ॥ ૬૯॥

શાસ્ત્રપ્રામાણનિર્માણૈર્વ્યવહારો ભવેત્તદા ।
ભર્તૃનિયોગાદન્યોઽન્યવિગ્રાત્સ્પર્ધયાપિ ભરતાનામ્ ॥ ૭૦॥

અર્થપતાકા હેતોસ્સંઘર્ષો નામ સંભવતિ ।
તેષાં કાર્યં વ્યવહારદર્શનં પક્ષપાતવિરહેણ ॥ ૭૧॥

કૃત્વા પણં પતાકાં વ્યવહારઃ સ ભવિતવ્યસ્તુ ।
સર્વૈરનન્યમતિભિઃ સુખોપવિષ્ટૈશ્ચ શુદ્ધભાવૈશ્ચ ॥ ૭૨॥

યૈર્લેખકગમકસહાયાસ્સહ સિદ્ધિભિર્ધાતાઃ ।
નાત્યાસનૈર્નદૂરસંસ્થિતૈઃ પ્રેક્ષકૈસ્તુ ભવિતવ્યમ્ ॥ ૭૩॥

તેષામાસનયોગો દ્વાદશહસ્તસ્થિતઃ કાર્યઃ ।
યાનિ વિહિતાનિ પૂર્વં સિદ્ધિસ્થાનાનિ તાનિ લક્ષ્યાણિ ॥ ૭૪॥

ઘાતાશ્ચ લક્ષણીયાઃ પ્રયોગતો નાટ્યયોગે તુ ।
દૈવાદ્ઘાતસમુત્થાઃ પરોત્થિતા વા બુધૈર્નવૈર્લેખ્યાઃ ॥ ૭૫॥

ઘાતા નાટ્યસમુત્થા હ્યાત્મસમુત્થાસ્તુ લેખ્યાઃ સ્યુઃ ।
ઘાતા યસ્ય ત્વલ્પાઃ સંખ્યાતાઃ સિદ્ધયશ્ચ બહુલાઃ સ્યુઃ ॥ ૭૬॥

વિદિતં કૃત્વા રાજ્ઞસ્તસ્મૈ દેયા પતાકા હિ ।
સિધ્યતિશયાત્પતાકા સમસિદ્ધૌ પાર્થિવાજ્ઞયા દેયા ॥ ૭૭॥

અથ નરપતિઃ સમઃ સ્યાદુભયોરપિ સા તદા દેયા ।
એવં વિધિજ્ઞૈર્યષ્ટવ્યો વ્યવહારઃ સમઞ્જસામ્ ॥ ૭૮॥

સ્વસ્થચિત્તસુખાસિનૈઃ સુવિશિષ્ટૈર્ગુણાર્થિભિઃ ।
વિમૃશ્ય પ્રેક્ષકૈર્ગ્રાહ્યં સર્વરાગપરાઙ્ગમુખૈઃ ॥ ૭૯॥

સાધન દૂષણાભાસઃ પ્રયોગસમયાશ્રિતૈઃ ।
સમત્વમઙ્ગમાધુર્યં પાઠ્યં પ્રકૃતયો રસાઃ ॥ ૮૦॥

વાદ્યં ગાનં સનેપથ્યમેતજ્જ્ઞેયં પ્રયત્નતઃ ।
ગીતવાદિત્રતાલેન કલાન્તરકલાસુ ચ ॥ ૮૧॥

ઉઅદઙ્ગં ક્રિયતે નાટ્યં સમન્તાત્ સમમુચ્યતે ।
અઙ્ગોપાઙ્ગસમાયુક્તં ગીતતાલલયાન્વિતમ્ ॥ ૮૨॥

ગાનવાદ્યસમત્વં ચ તદ્બુધૈઃ સમમુચ્યતે ।
સનિર્ભુગ્નમુરઃ કૃત્વા ચતુરશ્રકુતૌ કરૌ ॥ ૮૩॥

ગ્રીવાઞ્ચિતા તથા કર્યા ત્વઙ્ગમાધુર્યમેવ ચ ।
પૂર્વોક્તાનીહ શેષાણિ યાનિ દ્રવ્યાણિ સાધકે હ્ ॥ ૮૪॥

વદ્યાદીનાં પુનર્વુપ્રા લક્ષણં સન્નિબોધત ।
વાદ્યપ્રભૃતયો ગાનં વાદ્યમાણાનિ નિર્દિશેત્ ॥ ૮૫॥

યાનિ સ્થાનાનિ સિદ્ધીનાં તૈઃ સિદ્ધિં તુ પ્રકાશયેત્ ।
હર્ષાદઙ્ગસમુદ્ભૂતાં નાનારસસમુત્થિતામ્ ॥ ૮૬॥

વારકાલાસ્તુ વિજ્ઞેયા નાટ્યજ્ઞૈર્વિવિધાશ્રયાઃ ।
દિવસૈશ્ચૈવ રાત્રિશ્ચ તયોર્વારાન્ નિબોધત ॥ ૮૭॥

પૂર્વાહ્નસ્ત્વથ મધ્યાહ્નસ્ત્વપરાહ્નસ્તથૈવ ચ ।
દિવા સમુત્થા વિજ્ઞેયા નાટ્યવારાઃ પ્રયોગતઃ ॥ ૮૮॥

પ્રાદોષિકાર્ધરાત્રિશ્ચ તથા પ્રાભાતિકોઽપરઃ ।

નાટ્યવારા ભવન્ત્યેતે રાત્રાવિત્યનુપૂર્વશઃ ॥ ૮૯॥

એતેષાં અત્ર યદ્યોજ્યં નાટ્યકાર્યં રસાશ્રયમ્ ।
તદહં સમ્પ્રવક્ષ્યામિ વારકાલસમાશ્રયમ્ ॥ ૯૦॥

યચ્છ્રોત્રરમણીયં સ્યાદ્ધર્મોત્થનકૃતં ચ યત્ ।
પૂર્વાહ્ણે તત્પ્રયોક્તવ્યં શુદ્ધં વા વિકૃતં તથા ॥ ૯૧॥

સત્ત્વોત્થાનગુણૈર્યુક્તં વાદ્યભૂયિષ્ઠમેવ ચ ।
પુષ્કલં સત્ત્વયુક્તં ચ અપરાહ્ણે પ્રયોજયેત્ ॥ ૯૨॥

કૈશિકીવૃત્તિસંયુક્તં શ‍ૃઙ્ગારરસસંશ્રયમ્ ।
નૃત્યવાદિત્રગીતાઢ્યં પ્રદોષે નાટ્યમિષ્યતે ॥ ૯૩॥

યન્નર્મહાસ્યબહુલં કરુણપ્રાયમેવ ચ ।
પ્રભાતકાલે તત્કાર્યં નાટ્યં નિદ્રાવિનાશનમ્ ॥ ૯૪॥

અર્ધરાત્રે નિયુઞ્જીત સમધ્યાહ્ને તથૈવ ચ ।
સન્ધ્યાભોજનકાલે ચ નાટ્યં નૈવ પ્રયોજયેત્ ॥ ૯૫॥

એવં કાલં ચ દેશં ચ સમીક્ષ્ય ચ બલાબલમ્ ।
નિત્યં નાટ્યં પ્રયુઞ્જીત યથાભાવં યથારસમ્ ॥ ૯૬॥

અથવ દેશકાલૌ ચ ન પરીક્ષ્યૌ પ્રયોક્તૃભિઃ
યથૈવાજ્ઞાપયેદ્ભર્તા તદા યોજ્યમસંશયમ્। । ૯૭॥

તથા સમુદિઆતાશ્ચૈવ વિજ્ઞેયા નાટકાશ્રિતાઃ ।
પાત્રં પ્રયોગમૃદ્ધિશ્ચ વિજ્ઞેયાસ્તુ ત્રયો ગુણાઃ ॥ ૯૮॥

બુદ્ધિમત્વં સુરૂપત્વં લયતાલજ્ઞતા તથા ।
રસભાવજ્ઞતા ચૈવ વયસ્સ્થત્વં કુતૂહલમ્ ॥ ૯૯॥

ગ્રહણં ધારણં ચૈવ ગાત્રાવૈકલ્યમેવ ચ ।
નિજસાધ્વસતોત્સાહ ઇતિ પાત્રગતો વિધિઃ ॥ ૧૦૦॥

સુવાદ્યતા સુગાનત્વં સુપાઠ્યત્વં તથૈવ ચ ।
શાસ્ત્રકર્મસમાયોગઃ પ્રયોગ ઇતિ સંજ્ઞિતઃ ॥ ૧૦૧॥

શુચિભૂષણતાયાં તુ માલ્યાભરણવાસસામ્ ।
વિચિત્રરચના ચૈવ સમૃદ્ધિરિતિ સંજ્ઞિતા ॥ ૧૦૨॥

યદા સમુદિતાઃ સર્વે એકીભૂતા ભવન્તિ હિ ।
અલઙ્કારાઃ સકુતપા મન્તવ્યો નાટકાશ્રયાઃ ॥ ૧૦૩॥

એતદુક્તં દ્વિજશ્રેષ્ઠાઃ સિદ્ધીનાં લક્ષણં મયા ।
અત ઊર્ધ્વં પ્રવક્ષ્યામ્યાતોદ્યાનાં વિકલ્પનમ્ ॥ ૧૦૪॥

ઇતિ ભારતીયે નાટ્યશાસ્ત્રે સિદ્ધિવ્યઞ્જકો
નામ સપ્તવિંશોઽધ્યાયઃ ॥

Encoded by Padmakar Dadegaonkar dadegaonkar@yahoo.com

*Natya Shastra Chapter 27*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*